# M.A. 3rd Semester Examination, 2024

## SANSKRIT

PAPER—SAN-303(A, B & C)

*Full Marks* : 50

*Time* : 2 hours

Answer **all** questions

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

GROUP – A

(*Literature*)

सर्वे प्रश्नाः संस्कृतेन देवनागर्या च समाधेयाः

1. प्रश्नद्वयं समाधेयम्— 10×2

(क) रसस्वरूपमभिधाय तन्निष्पत्तौ भरतरससूत्रं भट्टलोल्लटदिशा विमृशत ।

*अथवा*

अभिहितान्वयवादान्विताभिधानवादाभ्यां व्यङ्ग्य-स्याभिधेयत्वं न सम्भवतीति मम्मटचार्याभिमतं सारत आलोच्यताम् ।

(*ख*) 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इति प्रतिपदव्या-वृत्तिपुरःसरं पर्यालोच्यताम् ।

*अथवा*

जगन्नाथसम्मतं द्वितीयं काव्यं सोदाहरणं व्याख्याय द्वितीय-तृतीययोः पार्थक्यं प्रतिपादयत ।

2. यथेच्छं द्वयोर्व्याख्या कार्या— 5 × 2

(*क*) विवक्षितं चान्यपरं वाच्यं यत्रापरस्तु सः ।

(*ख*) धर्मिणि प्रदर्शिते धर्माणां हेयोपादेयता ज्ञायते ।

(*ग*) अगूढं तु स्फुटतया वाच्यायमानमिति गुणीभूतमेव ।

3. यथेच्छं द्वयोर्व्याख्या कार्या— 5 × 2

(*क*) तस्य च कारणं कविगता केवला प्रतिभा ।

(ख) शब्दार्थौ यत्र गुणीभावितात्मानौ कमप्यर्थमभिव्यङ्क्तस्त-दाद्यम् ।

(ग) आस्वादोद्बोधकत्वमेव काव्यत्वप्रयोजकम् ।

**[ Internal Assessment — 10 Marks ]**

## GROUP – B

## (*Paniniya Vyakarana*)

सर्वे प्रश्नाः संस्कृतेन देवनागर्या च समाधेयाः

**1.** प्रश्नद्वयं समाधेयम्— $10 \times 2$

(क) अनुबन्धानामनेकाल्त्वं स्वीक्रियते न वेति विचार्य नानुबन्धकृतमनेजन्तत्वमिति कथं ज्ञाप्यते सोदाहरण-मालोच्यताम् ।

*अथवा*

कार्यकालं संज्ञापरिभाषम् इति पक्षं सयुक्तिकं नागेशदिशा विचार्यताम् ।

(*ख*) वैयाकरणमते को नाम धात्वर्थः ? कृञोऽकर्मतापत्तिः कथं स्यात् ? तन्निराकरणे का युक्तयो वैयाकरणैः प्रदर्शिताः ?

***अथवा***

व्याकरणदर्शनग्रन्थरूपेण भूषणसारस्य वैशिष्ट्यं पर्यालोच्यताम् ।

**2.** यथेच्छं द्वयोर्व्याख्या कार्या— 5 × 2

(*क*) नत्वा साम्बं शिवं ब्रह्म नागेशः कुरुते सुधीः ।
बालानां सुखबोधाय परिभाषेन्दुशेखरः ।।

(*ख*) गौणमुख्ययोर्मुख्ये कार्य्यसम्प्रत्ययः ।

(*ग*) यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः ।

**3.** यथेच्छं द्वयोर्व्याख्या कार्या— 5 × 2

(*क*) फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः ।
तत्र निर्णीत एवार्थः सङ्क्षेपेणेह कथ्यते ।।

(*ख*) कालस्तु व्यापारे विशेषणम् ।

(*ग*) फलव्यापारयोस्तत्र फले तङ्–यक्–चिणादयः ।
व्यापारे शण्श्नमाद्यास्तु द्योतयन्त्याश्रयान्वयम् ।।

**[ Internal Assessment – 10 Marks ]**

## GROUP – C

## (*Indian Philosophy*)

**सर्वे प्रश्नाः संस्कृतेनैव समाधेयाः**

**क–विभाग**

**1.** एकः प्रश्नः समाधेयः — 10

(*क*) सांख्यमतानुसारं प्रत्ययसर्गः निरूप्यताम् ।

(*ख*) सांख्यमते का नाम तुष्टिः ? सा कति विधा ? तासां स्वरूपम् आलोच्यताम् ।

**2.** द्वयोः व्याख्या कार्या — 10

(*क*) बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि ।
वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः ।।

(ख) स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या ।
सामान्यकरणवृत्तिः पाणाद्या वायवः पञ्च ॥

(ग) सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात् ।
तस्मात् त्रिविधं करणं द्वारि द्वाराणि शेषाणि ॥

## ख–विभाग

3. एकः प्रश्नः समाधेयः — 10

(क) योगसारसंग्रहानुसारेण सम्प्रज्ञातसमाधेः स्वरूपं निरूपणीयम् ।

(ख) योगसारसंग्रहानुसारेण पुरूषस्य भोगस्य स्वरूपम् आलोच्यताम् ।

4. द्वयोः टीका लेख्या — $5 \times 2$

(क) विकल्पः ।

(ख) प्रत्यक्षम् ।

(ग) वैराग्यम् ।

**[ Internal Assessment — 10 Marks ]**